# समयगीतिका

*कविः डॉ. हरेकृष्णमेहेरः ओडिशाराज्यस्य नूआपडाजिल्लान्तर्गते सिनापालिग्रामे कविपरम्परावाहिनि वंशे लब्धजन्मा । विविधभाषासु कृतविद्यः मौलिकलेखकः सफलानुवादकश्च । विविधसम्मानैः सम्मानितः अयं कविः समग्रराज्ये देशे च सुपरिचितः । प्रस्तुता कविता तत्प्रणीतात् मातृगीतिकाञ्जलिः इति गीतिकाव्यात् आनीता ।*

समय ! नमस्ते, समय ! नमस्ते,
आत्मवशे ते
सकलं शेते
विपुलं विश्वं नमयसि हस्ते ।
समय ! नमस्ते
समय ! नमस्ते ।। (ध्रुवम्)

विहित-वहित्रे
वीचि-विचित्रे
दुस्तर-भव-जलनिधौ निकामम्,
भवतो लीला
विलोल-शीला
प्रबलं चलति नियतमविरामम् ।
अप्रतिबन्धो जगद्भ्रमस्ते ।
समय ! नमस्ते
समय ! नमस्ते ।। (१)

तव रमणीया
गति-रमणी या
विहरति सरल-तरल-सुविकारा,
लास्य-विलासा
हास्य-सुरासा
वरण-हरण-कारण-सुख-कारा ।
विषमः सुषमः सुविभ्रमस्ते ।
समय ! नमस्ते
समय ! नमस्ते ।।(२)

ऋद्धं निःस्वं
निखिल-खनिः स्वं
नितरां वितरसि किमपि रसालम्,
क्वचिदपि दीपं
तमःप्रतीपं
रूपं सौम्य-कराल-विशालम् ।
द्वन्द्वमयोऽयं किल नियमस्ते ।
समय ! नमस्ते
समय ! नमस्ते ।। (३)

भुवि भवदीया
वहति नदी या
प्रखराऽधीरा क्षणमय-धारा,
विरहं विधुरं
मिलनं मधुरं
तनुते वासर-रजनी-पारा ।
न कोऽपि रोद्धुं रयं क्षमस्ते ।
समय ! नमस्ते
समय ! नमस्ते ।।(४)

क्वचिदुत्कर्षं
क्वचिदपकर्षं
चित्रं रचयति भवतश्चक्रम्,
अबलं सबलं
शुष्कं सजलं
स्वैरं कुरुते सरलं वक्रम् ।
अलङ्घनीयो नय-क्रमस्ते ।
समय ! नमस्ते
समय ! नमस्ते ।।(५)

भूत-भविष्यत्
साम्प्रतिकं यत्
प्रसृतं तव हि वितान-समस्तम्,
स्मृतिपथमयते
विधौ समय ! ते
सुचिरं चराचरं गतमस्तम् ।
अगम्य-महिमा गगन-समस्ते ।
समय ! नमस्ते
समय ! नमस्ते ।। (६)

विश्व-नियन्ता
त्वमिह निहन्ता
बहुविध-कर्माकर्म-विधाता,
त्वयि चिर-दास्यं
नूनमुपास्यं
मौनी त्वं निर्मम-निर्माता ।
प्रसरतु सुतरां शुभ-धर्मस्ते ।
समय ! नमस्ते
समय ! नमस्ते ।।(७)

## टिप्पणी

नमस्ते - ତୁମକୁ ନମସ୍କାର (नम: + ते (प्रणाम:)) । आत्मवशे - ନିଜ ଅଧୀନରେ (निजवशे) । सकलम् - ସବୁ (समस्तम्) । विश्वम् - ପୃଥିବୀ (पृथिवी) । विपुलम् - ବିସ୍ତାରିତ (विस्तीर्णम्) । वहित्रे - ଡଙ୍ଗାରେ (नौकायाम्) । वीचि: - ତରଙ୍ଗ (तरङ्ग:) । जलनिधौ - ସମୁଦ୍ରରେ (सागरे) । निकामम् - ଅତ୍ୟନ୍ତ (अत्यन्तम्) । विलोलशीला- ଚଞ୍ଚଳସ୍ୱଭାବ (विलोलं शीलं यस्या:सा) । अप्रतिबन्ध - ବାଧାରହିତ (बाधारहित) । रमणीया - ସୁନ୍ଦର (मनोरमा) । सुविकारा- ଉତ୍ତମବିକାରଯୁକ୍ତ (उत्तमविकारयुक्ता) । सुविभ्रम: - ଅଙ୍ଗଭଙ୍ଗୀ (सुविलास: / अङ्गभङ्गी) । क्वचित्- କୌଣସି ସ୍ଥାନରେ (कुत्रचित्) । प्रतीपम् - ବିପରୀତ (विपरीतम्) । कराल:- ଭୟଙ୍କର (भयङ्कर:) ।

## अभ्यासः

1. **निजभाषया वाक्यद्वयेन वाक्यत्रयेण वा उत्तरं लिखत ।**

   (क) समयस्य विभिन्नरूपतां वर्णयत ।

   (ख) मानवजीवने उत्थानपतनादिकं कथं समयस्य वशीभूतम् ?

   (ग) समयस्य वितानः कः ?

   (घ) का गतिः ? सा केन रूपेण चित्रिता ?

   (ङ) समयः कथं निर्ममनिर्मता ?

2. **निजभाषया एकपदात्मकं / अतिसंक्षिप्तम् उत्तरं लिखत ।**

   (क) समयनदी कीदृशी ?

   (ख) समयस्य लीला कीदृशी ?

   (ग) का समयस्य गतिः ?

   (घ) समयस्य गतिः केन रूपेण चित्रिता ?

   (ङ) समयस्य नियमः कीदृशः ?

   (च) नद्याः पारद्वयं किम् ?

   (छ) समयचक्रं किं रचयति ?

   (ज) समयस्य महिमा कीदृशः ?

   (झ) समयस्य सर्वे कथं दास्यं गताः ?

   (ञ) कथं चराचरं समयेन अस्तं याति ?

3. **सन्धिविच्छेदं कुरुत ।**

   नमस्ते, दुस्तर, नियतमविरामम्, भ्रमस्ते, सुविभ्रमस्ते

4. **सन्धिं कुरुत ।**

   क्वचित् + अपि, द्वन्दमयः + अयम्, नियमः + ते, प्रखरा + अधीरा, कः + अपि, क्षमः + ते, क्वचित् + उत्कर्षम्, क्वचित् + अपकर्षम्, त्वम् + इह, नूनम् + उपास्यम् ।

5. **वाक्यानि रचयत ।**

   ते, चलति, तव, या, नितराम्, किल, अयम्, विशालम्, मधुरम्, वहति ।

●●●